# Yatiraja Vijaya Shlokah

# यतिराजविजयश्लोकाः

## Document Information

Text title : Yatiraja Vijaya Shlokah

File name : yatirAjavijayashlokAH.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# यतिराजविजयश्लोकाः

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीघटिकाशतवात्स्यवरदगुरवे नमः ॥

श्रीघटिकाशतवात्स्यवरद्गुरुभिरनुगृहीताः
॥ अथ यतिराजविजयश्लोकाः (१)॥

नमो वरदविष्ण्वार्यनयनानन्ददायिने ।
वात्स्याय वरदार्याय वादिनीहारभास्वते ॥

मायाविमोहितसुरानसुरानलावीत्
येनाच्युतस्स कुहनासमयैर्मनुष्यान् ।
सम्मोहयत्सु पुनरेषु सुदर्शनोऽपि
तानेव जेतुमधुना यतिशेखरोऽभूत् ॥ १॥

त्रिदण्डकाषायशिखोपवीतैः
प्रसाधयन् पारमहंस्यलक्ष्मीम् ।
वैकुण्ठमारोपयितुं मुमुक्षून्
सोपानकारी यतिराज एषः ॥ २॥

स एष साक्षात्कृतकृष्णदत्तां
निक्षेपविद्यां निरवद्यभूमा ।
गद्यात्मना कृष्णजनोपभोग्यां
संवादरूपां विदधे दयालुः ॥ ३॥

प्रमाणेष्वेष वेदान्तः प्रमेयेषु परः पुमान् ।
प्रमातृषु यतीन्द्रोऽयं न द्वितीयमपेक्षते ॥ ४॥

कर्मव्याजकृताखिलात्मनिवहक्लेशावबोधस्फुरत्-

पश्चात्तापकृपाविमोचितजगज्जन्मादिलीलादरम् ।
भोगैकप्रवणं विधास्यति परं ब्रह्मापि दत्ताभयः
भूतेभ्यो यतिराज एष इति मे चेतस्यभून्निश्चयः ॥ ५॥

देहाक्षादिविलक्षणोऽणुरजडो नित्योऽहमर्थोऽमल-
ज्ञानानन्दमयोऽप्यतन्मय इव भ्राम्यत्यविद्यावृतः ।
पञ्चक्लेशविपाकपावकशिखालीढस्य तस्यात्मनः
निर्वाणाय निसर्गसौहृदनिधे ! नान्या गतिस्त्वांविना ॥ ६॥

सर्वज्ञो न न वेद तस्य करुणाराशेरुपेक्षा कुतः
सर्वेशः किमसौ न शक्ष्यति परित्रातुं तथापि प्रभुः ।
सर्वान् रक्षति यत्कटाक्षकणिकापेक्षी नरानुद्धरन्
संसाराम्बुनिधेः स एव हि गुरुः सर्वोत्तरं दैवतम् ॥ ७॥

त्रिवर्गमवधीरयन् त्रिविधचेतनाचेतन-
प्रपञ्चमयकञ्चुके भगवति स्वयं ज्योतिषि ।
निवेशितधियां सतां निखिलमङ्गलैकास्पदं
तमेव कथयन् गतिं यतिभिरीडितः क्रीडति ॥ ८॥

कुदर्शनानीतरदर्शनानि
यतीन्द्र ! कुर्वन्निजदर्शनेन ।
सम्यक् श्रुतिन्यायकलापदर्शी
सुदर्शनोऽसि प्रियदर्शनस्त्वम् ॥ ९॥

काले वर्षतु वासवः क्षितिभुजो रक्षन्तु सम्यक् महीं
सर्वे सन्तु निरामयाश्च कृतिनः सत्वोत्तराः प्राणिनः ।
पुण्या लोकमिदं पुनातु भगवद्भक्तिः चिरस्थायिनी
मालावत् यतिशेखरस्य विहरत्वाज्ञा नृणां मूर्धसु ॥ १०॥

इति श्रीघटिकाशतवात्स्यवरदगुरुभिरनुगृहीताः
यतिराजविजयश्लोकाः सम्पूर्णाः ।

Footnote

(१) श्रीघटिकाशतवात्स्यवरद्गुरुभिः (एते श्रीश्रुतप्रकाशिकाप्रसूतेः श्रीनडादूरम्माळ् वात्स्यवरदगुरोः वंश्याः, श्रीनिगमान्तमहादेशिकस्य प्रशिष्याः, श्रीपरकालमठस्थापकस्य ब्रह्मतन्त्रस्वतन्त्रगुरोः शिष्याः, श्रीमदहोबिलमठस्थापकस्य शठकोपमुनेः आचार्याः ।)

अनुगृहीतात् यतिराजविजयनाटकात् उद्धृता इमे श्लोकाः ॥)

नमो वरद्विष्ण्वार्यनयनानन्ददायिने ।
वात्स्याय वरदार्याय वादिनीहारभास्वते ॥

॥ श्रीघटिकाशतवात्स्यवरदगुरवे नमः ॥

Proofread by Aruna Narayanan

---

*Yatiraja Vijaya Shlokah*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*